विदुरेणोक्तस्तैश्च सर्वैर्द्विजोत्तमैः। न चकार तथा राजा पुत्रस्नेहसमन्वितः” भा० आ० ११५ अ० २दुर्योधनीये त्रि०

**दुर्योनि** स्त्री निन्दिता योनिः प्रा० स०। १निन्दितायां जातौ दुःस्थिता योनिरस्य प्रा० ब०। २निन्दितजातिके त्रि० “न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति” मनुः।

**दुर्लतिका** स्त्री दुष्टा लतेव स्वार्थे क प्रा० स०। १निन्दितायां लतायां २छन्दोभेदे च “वसुभिश्च रसैरथ दिग्भिरुदीरितसद्यतिका विहिता हि सगणाष्टकभूषितसञ्चरणाञ्चितदुर्नय! दुर्लतिकेति तदा। फणभृत्कुलमङ्गलनामकनागवरप्रथिता सुकृतां सुखदा यशवन्न! धराधिप! गौडकुलोज्ज्वल! तामवधेहि हृदये सदा” वृ० रत्ना०।

**दुर्लभ** त्रि० दुःखेन लभ्यते दुर्+लभ—कर्म्मणि खल्। १लब्धुमशक्ये कृच्छ्रेण लभ्ये २दुष्प्राप्ये मेदि० ३अतिप्रशस्ते शब्दर० ४प्रिये हेमच०। “नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा” सा० द० “अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः” रामा० “दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः। दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः” चाणक्य० ५कच्छूरे पु० मेदि० ६कर्चूरे पु० राजनि० ७दुरालभायां ८श्वेतकण्टकार्य्याञ्च स्त्री राजनि०। ९विष्णौ पु० “दुर्लभो दुर्जयो दुर्गः” विष्णुसं०। “दुर्लभया भक्त्या लभ्यत इति दुर्लभः “जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते” इति व्यासवचनात् “भक्त्या लभ्यस्त्वनन्ययेति” भगवद्वचनात् भा० “आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम्” मनुः। “मत्परं दुर्लभं मत्वा नूनमावर्जितं मया” रघुः “कुसुमायुधपत्नि! दुर्लभस्तव भर्त्ता न चिराद् भविष्यति” कुमा०।

**दुर्ललित** न० दुर्+लल—ईप्सायां भावे क्त। दुष्टेच्छायां दुर्लभवस्तुवाञ्छायाम् (आब्दार) तस्या अन्यलाभाविषयत्वेन दुष्टत्वम्। २दुश्चेष्टिते च “स शशाप ततो रोषान्मुनिर्दुर्ललितं तव। अतिदुर्ललितैः कन्या शत्रुहस्तं गमिष्यति” हरिवं० १४९ अ०। कर्त्तरि क्त। ३तथाविधेच्छायुक्ते ४दुश्चेष्टान्विते ५चपले च त्रि० “बालस्य मे प्रकृतिदुर्ललितस्य पापः पापं व्यवस्यति समक्षमुदायुधोऽसौ” वेणी०।

**दुर्लसित** न० दुर्+लस—क्त। दुश्चेष्टायाम्।

**दुर्लाभ** पु० दुर्+लभ—घञ्। दुःखेन लाभे। “मोक्षदुर्ला-

भविष्यं वडवामुखसागरम्” भा० शा० ३०३ अ०।

**दुर्लेख्य** न० दुष्टं लेख्यम्। गर्हिते लेख्यपत्रे। “देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्” नार० सर्वैरेतैर्विशेषणैर्व्यवहाराक्षमता विवक्षिता। दुष्टं लिप्यक्षरपरिलोपेनावाचकतया वा यल्लेख्यं तत्तु दुर्लेख्यं, नष्टं सर्वथा नाशमुपगतम् उन्मृष्टं मसीदोषादिना स्फुटितलिप्यक्षरम्। यद्यपि दग्धमपि नष्टमेव तथापि कालमात्रकृता शीर्णता नष्टपदेनात्र विवक्षिता। पत्रान्तरकरणञ्चार्थिप्रत्यर्थिनोः परस्परसम्प्रतिपत्तौ। विमतौ तु देशान्तरस्थपत्रानयनाय कालो देयोऽध्वापेक्षया, व्यवहारो वाऽप्रवर्तनीयः दुर्लेख्यादौ तु सम्प्रतिपत्तौ पत्रान्तरकरणमन्यथा व्यवहारस्याप्रवृत्तिरेवेत्यवसेयं साक्षिषु सत्सु तैरेव निर्णयः”। तथाच नारदः “लेख्ये देशान्तरस्थे तु शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो द्रष्टृदर्शनमिति” वीरमि०

**दुर्व** बधे भ्वा० पर० सक० सेट्। दूर्वति अदूर्वीत्। ईदित्। दूर्त्तः

**दुर्वच** त्रि० दुःखेन उच्यते दुर्+वच—कर्म्मणि खल्। दुःखेन कथनीये वक्तुमशक्ये। “अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्” किरा०। खलर्थयोगे कर्त्तरि षष्ठ्या निषेधेन सम्बन्धविवक्षयाऽत्र षष्ठी” सौभराजमुपेत्याऽहमवोचं दुर्वचं वचः” भा० उ० १७७ अ०।

**दुर्वचस्** न० दुष्टं वचः प्रा० स०। गर्हिते वचने वचसो दुष्टत्वमप्रियावेदकत्वेन “असह्यं दुर्वचो ज्ञातेर्मर्मान्तरितरौद्रवत्” उद्भ० “नारीं जित्वा विकत्थन्ते न च जल्पन्ति दुर्वचः” भा० द्रो० १४८ अ०। दुःस्थितं वचोऽस्य प्रा० ब०। २दुष्टवचनवक्तरि त्रि०।

**दुर्वराह** पुंस्त्री० गर्हितो वराहः प्रा० स०। १गर्हिते वराहे विड्वराहे ग्राम्यशूकरे स्त्रियां जातित्वात् ङीष्। “त्रयो ह वापशवोऽमेध्या दुर्वराह एडकः श्वा” शत० ब्रा० १२।४।१।४

**दुर्वर्ण** न० निन्दितो हेमापेक्षया निकृष्टो वर्णोऽस्य। १रजते अमरः। “दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा” माघः २एलवालुके मेदि०। ३निन्द्यवर्णयुक्ते त्रि०। “न तत्र कश्चिद्दुर्वर्णो व्याधितो वापि दृश्यते” भा० व० १९६ श्लो० ४श्वेतकुष्ठिनि तस्य रजतवर्णशुभ्रत्वात् दुर्वर्णत्वम्। “दुर्वर्णः कुनखी कुष्ठी मायावी कुण्डगोलकौ” भा० व० १९९ अ०। दुष्टो वर्णः प्रा० स०। ५निन्द्ये ब्राह्मादिवर्णे च। “दुर्वर्णोऽस्य भ्रातृव्यः” तैत्ति० ब्रा० २।२।४।६। दुष्टे ६अक्षरे पु०।